International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 8 Issue 7, July- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

# वेदाङ्गपदार्थाः, एकं तथ्यात्मकविवेचनम् ।

**डॉ.रणजीत कुमार झा**

सहायक-आचार्य (शुक्लयजुर्वेद) संस्कृत शिक्षा राजस्थान जयपुर

(महाविद्यालय शाखा)

विदितमेव खलु सकलवैदिकधर्ममार्गानुयायिनां सदाचारसम्पन्नानां तत्रभवतां भवताम्। यत् सकलवाङ्मयस्याऽऽदिबीजभूतो वेदो भगवद्रूप इति । तदेव किञ्चिदत्र विविच्यते--

तल्लोकपद्मं स उ एव विष्णुः प्रावीविशत्सर्वगुणावभासम् ।

तस्मिन्स्वयं वेदमयो विधाता स्वयंभुवं यं प्रवदन्ति सोऽभूत्।।

तथाहि इतिहासपुराणानि पञ्चमं वेदमीश्वरः । सर्वेभ्य एव वक्त्रेभ्यः ससृजे सर्वदर्शनः ।। इति कथने साक्षात् विष्णुरूपः स्वयंभूः सर्ववदोपवेदेतिहासपुराणानां ज्ञानं तांश्च स्वस्वरूपवत्- नित्यसिद्धान् वेदान् भगवान् निजाचिन्त्यशक्त्या वैधदीक्षया ब्रह्माणमुपदिदेश । एतदेवोक्तं श्रुतौ-

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । इति अनया श्रुत्या च नित्यसिद्धानेव स्वान्तःस्थितान्वेदान्प्रणवमातृकारूपेण सुसूक्ष्मान्ब्रह्ममुखभ्य ऋगादिस्थूलरूपेणाऽऽविर्भावयामासेति तावदुच्यते । यथा च वेदाः स्वतः प्रमाणं तथा नित्या अपि सन्ति तथा च सूत्रितं देवताधिकरणे बादरायणाचार्येण- अत एव च नित्यत्वम्' - ब्र०सू० - १/३/९/१९ । अत एव विलिखितं ब्रह्मकाण्डे-

अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।

आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।।३ इति स्मृतेः ।

अथ च वाचा विरूपनित्यया- तै०सं० २/५/११ इति श्रुतेश्च वेदानां नित्यत्वम् इति। यच्चोक्तम्– ऋचः सामानि जज्ञिरे - तै०आ० ३ / ११ इति । तत्राप्याविर्भाव एव बोध्यः । जनेः प्रादुर्भावार्थकत्वात् । ५

ननु-- शास्त्रयोनित्वात् इति ब्र०सू० ६१/१/३ इति व्याससूत्रस्य का गतिरिति चेत्- तत्र योनिशब्दः प्रमाणार्थक एव बोध्यः । तेन – तं त्वौपनिषदं पुरुषं पृच्छामि इति उपनिषद्वेद्यत्वं ब्रह्मणस्तत्सूत्रं प्रशास्ति । किञ्च - एवं वा अरेऽअस्य महतो भूतस्य निःश्वसितमेतदृग्वेदो यजुर्वेदः सामवेदः इति बृहदारण्यके - २/४/१० इत्यादिश्रुतिरपि वेदानामुत्पत्तिं निराकरोति ।

१. श्रीमद्भागवते दशमस्कन्धे वेदविज्ञानवर्णन समये । २. श्री बादरायणाचार्येण ब्रह्मसूत्रे १/३/९/१९ तमे । ३.

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 8 Issue 7, July- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

वाक्यपदीय ब्रह्मकाण्डे ४. तैत्तिरीयसंहितायाम् २/५/११ ५. वेदसंहितायाम् एवं तै०आ० ३ / ११ ६. ब्रह्मसूत्रम् १/१/३

श्वासप्रश्वासादिवद्भगवानन्तः स्थितान्-वेदॉल्लीलयाऽऽ-विर्भावितवानित्यास्मिन्नेवार्थे श्रुतेस्तात्पर्यात् ज्ञायते । ननु लीलयाऽऽविर्भावकर्तृत्वेऽपि ब्रह्मोपादानता वेदानं जातैव । तस्माद् अपौरुषेयत्वं नामास्ति - पुरुषमात्रजन्यत्वेऽपि पौरुषेयत्वे वर्णानां नित्यत्वेऽप्यानुपूर्वीविशेषनिर्देशजन्यत्वात् मीमांसकमतमपि वेदाप्रमाण्यप्रसङ्गात् तस्य नित्यत्वं सिद्धयति ।

एतेषां वेदानां च प्रथमतः प्रणवरूपेण सूक्ष्मतयाऽवस्थितिरासीत् । ततः प्रणवतो मातृकाणामाविर्भावोऽभवत् । तास्ता एव मातृका या अक्षरसमाम्नायत्वेनो-च्यन्ते। तस्मादक्षरसमाम्नायत एव सर्वा आन्वीक्षिक्यादयोऽष्टादशविद्या अपि ब्रह्मद्वारा सम्भूताः । तदेतदुक्तं श्रीमद्भागवते तृतीयस्कन्धे विदुरं प्रति मैत्रेयेण—

ऋग्यजुःसामाथर्वाख्यान्वेदादीन्मुखतोऽसृजत् । इत्यारभ्य---------

आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च ।।1

विद्याः समस्ताः तव देवि भेदाः इति तत्र वेदाङ्गानां शास्त्रीयं महत्त्वं सर्वतोमुख्यं वर्तते । सर्वं ज्ञानमयो हि सः इति वदता मनुना वेदानां सर्वविधज्ञाननिधानत्वं तत्र उररीकृतम्। एतेषां वेदानां च प्रथमतः प्रणवरूपेण सूक्ष्मतया अवस्थितिरासीदिति ततः प्रणवतो मातृकाणामाविर्भावोऽभवत् ।

तास्ता एव मातृका या अक्षरसमाम्नायत्वेनोच्यन्ते । इतीतहासविदां विदुषां मध्ये चर्चाऽस्ति। तस्मादक्षरसमाम्नायत एव सर्वा आन्वीक्षिक्यादयोऽष्टादशविद्या अपि ब्रह्मद्वारा सम्भूताः। तदेदुक्तं श्रीमद्भागवते तृतीयेस्कन्धे विदुरं प्रति मैत्रेयेण प्रोक्तम्-ऋग्यजुःसामाथर्वाख्यान्वेदादीन्मुखतोऽसृजत् । इत्यारभ्य आन्वीक्षिकी त्रयी वार्ता दण्डनीतिस्तथैव च, इत्यादिना सर्वा खलु अपि विद्याः अधिजग्राह इति ।

तत्रैतासामष्टादशविद्यानां भेदाः प्रत्येकशोऽनन्तशाखावशादनन्तशः प्रसृताः सन्ति । मुख्यतया ता अष्टादशविद्याश्चाधुनोद्देशादिक्रमेण स्तोकं प्रदर्श्यन्ते । ततश्च—

तदेतदुक्तं श्रीमद्भागवते तृतीयस्कन्धे विदुरं प्रति मैत्रेयेण ।

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 8 Issue 7, July- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

मार्कण्डेयपुराणान्तर्गते दुर्गासप्तशत्यां चतुर्थाध्याये--

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नाम्।
देवी त्रयी भगतवी भवभावनाय वार्ता च सर्वजगतां परमार्तिहन्त्री ।।१०।।1

तत्र ऋग्यजुःसामाथर्वभेदेन वेदाश्चत्वारो भेदाः सत्यवतीसूनुभिः प्रसृताः । शिक्षा, कल्पो, व्याकरणं, निरुक्तं, ज्योतिःशास्त्रं, छन्दोविचितिरिति षड्वेदाङ्गानि प्रादुर्भवन्ति । पुराणानि न्यायविस्तरः मीमांसाधर्मशास्त्रमिति चत्वारि ह्युपाङ्गानि सन्ति । आयुर्वेद- धनुर्वेदगान्धर्वाथर्वशास्त्राणीति चत्वार उपवेदा इति मिलित्वा सङ्कलनयाऽष्टादशविद्याः भवन्ति । तत्र च महापुराणेषूपपुराणाना-मन्तर्भावो भवन्ति । न्यायनये वैशेषिकनयस्यान्तर्भावो भवति। मीमांसायां वेदान्तस्यान्तर्भावो भवति। धर्मशास्त्रे च महाभारतरामायणयोः, सांख्यपातञ्जलपाशुपत- वैष्णवाऽऽदीनां चान्तर्भावाः भवन्ति।

एवञ्चाष्टादशविद्यारूपाण्येतावन्ति ह्यास्तिकादीनां धर्मप्रस्थानानि । अन्येषामेक- देशिनां धर्मप्रस्थानानामेष्वेवान्तर्भावाः भवन्ति । इत्थमिह साक्षात्परम्परया परमार्थोपयोगिनां वेदोपाकरणानामेव प्रस्थानानां भेदो दिङ्मात्रेण दर्शितः ।

अथैतेषां प्रस्थानानां स्वरूपभेदहेतुः प्रयोजनभेदस्तावत् किञ्चिदुच्यते । तत्र धर्मप्रतिपादक-मपौरुषेयं वाक्यं वेदः । स च मन्त्रब्राह्मणात्मकः । उक्तं च मन्त्रब्राह्मणयोर्वेदनामधेयम् । आपस्तम्ब श्रौतसूत्रे परिशिष्टभागे इति तत्स्वरूपस्य विशदं वर्णनं प्राप्यते। तत्र मन्त्रा अनुष्ठानकारक - भूतद्रव्यदेवताप्रकाशकाः । ते च ऋग्यजुःसामभेदेन त्रिविधा इति । अथर्वणवेदस्यैतेषु त्रिष्वेवान्तर्भूतत्वेन पृथक्तया न विधानम् । तदेवं निरूपिता मन्त्राः ।

तत्र मन्त्रव्याख्यानरूपं ब्राह्मणमपि त्रिविधम् । विधिरूपमर्थवादरूपं तदुभयविलक्षणञ्चेति । तत्र विध्यादीनां लक्षणभेदादि-विस्तरोऽन्यतोऽवधेयः । तदेतद् ब्राह्मणञ्च पुररष्टविधम् इति । तदुक्तं वृहदारण्यके------

इतिहासः पुराणं विद्या उपनिषद् श्लोकाः सत्राणि व्याख्यानानि अनुव्याख्यानानि । अस्यैव निःश्वासितानि इति। तत्र कथाप्रतिपादक इतिहासः। विश्वस्य पूर्वावस्थानिरूपकं पुराणम्। उपासनात्मकविद्याप्रतिपादिका विद्याः याश्चोपास्यदेव-रहस्यप्रतिपादिका सोपनिषत्। ये मन्त्राः श्लोकवत् पठन्ते ते श्लोकाः । साङ्क्षिप्तार्थप्रतिपादकं सूत्रम् । विस्तृतार्थप्रतिपादकं व्याख्यानम्। व्याख्यानस्यापि स्फुटताप्रतिपादक - मनुव्याख्यानम्। एतान्यष्ट ब्राह्मणानि इति ।

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 8 Issue 7, July- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

१. मार्कण्डेयपुराणान्तर्गते दुर्गासप्तशत्यां चतुर्थाध्याये--

शिक्षाकल्परहस्यादीनाञ्च वेदसाङ्गताप्रतिपादकत्वमेव मन्त्रब्राह्मणयोर्व्याख्येय-व्याख्यानतो भावोऽस्ति । मान्त्रवर्णिकम् इति सूत्रव्याख्याने प्रतिपादितं वृत्तिकारैः ।

एवञ्च कर्मकाण्ड-गुणकाण्ड - ब्रह्मकाण्डात्मको वेदो धर्मार्थकाममोक्षहेतुः । स च हौत्र - आध्वर्यव-औद्गात्रप्रयोत्रयरूपेण यज्ञकर्मविभागनिर्वाहार्थं भिन्नः । अथर्ववेदस्तु चतुर्थो वेदत्रयी-अवशिष्टब्रह्मत्वकर्त्तव्यताप्रतिपादकोऽपि गार्ह्यकर्मशान्तिक-पौष्टिकअभिचारिकादिकर्मप्रति-पादकत्वेन सर्वोपयोगी एव । आचार्यप्रवचनभेदात् प्रतिवेदं भिन्नाः भूयस्यः शाखाः सन्ति । तज्ज्ञानञ्च चरणव्यूहाख्यवैदिकग्रन्थाद् बोध्यम् ।

अथ षण्णां शिक्षादिवेदाङ्गानाञ्च प्रयोजनं तावत् प्रस्तोष्ये । प्रथमं तावत् अङ्गशब्दस्य व्युत्पत्तिलभ्योऽर्थो भवति उपकारक इति । तथा चाह काव्यप्रकाशे साहित्यदर्पणे च-

उपकुर्वन्ति तं सन्तो (न्तं) येऽङ्गद्वारेण जातुचित् ।1

हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।2 इति काव्यप्रकाशे ध्वनितम् ।

तथैव शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः । रसादीमुप-कुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्।। इति साहित्यदर्पणे दश- १०/०१'3 तथाहि अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि । वेदस्य अङ्गानि वेदाङ्गानि । अङ्गशब्द उपकारार्थे प्रयुक्तोऽस्ति । अङ्गमुपकाराय प्रवर्तते । यथा अङ्गैः रहितः कश्चित् पुरुषः कस्मिंस्चित् कार्यव्यवहारे सर्वथा अनुपयुक्तः तथैव अङ्गानामभावे वेदः प्रयोजनशून्यो जायेत ।

अङ्गं पदार्थं वस्तुजातं ज्ञायपयति बोधयति जनयति च ज्ञानं तस्य वास्तविकं सत्ता जनेषु दृढ़यति। अङ्गं विना परिचयोऽपि पदार्थस्य दुर्लभ असम्भवश्चेति । वेदस्येमानि अङ्गानि वेदं पुष्णन्ति साहाय्यं कुर्वन्ति तस्योपयोगं वेदयन्ति, महत्त्वं जनयन्ति किं बहुना वेदस्य सर्वतोभावेन वेदत्त्वं निरूपयन्ति। अत्रायमाशयः वैयाकरणैः कस्यापि वस्तुनः स्परूपपरिज्ञाने साहाय्यं प्राप्नोति ।

१. साहित्यदर्पणे २. काव्यप्रकाशे ध्वनितम्। ३.इति साहित्यदर्पणे दश- १०/०१

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 8 Issue 7, July- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

वेदः स्वयमेव दुर्बोधः दुरूहश्च विषयः । भाषाभावयोर्द्वयोरपि दृष्ट्या । यतोहि वैदिकवाङ्मयं समुद्रवदपारमगाधं हिमालयवत् ससारञ्चेति । अत एव देवैरपि समादृतं खलु निश्चयेन वेदार्थज्ञाने तत्कर्मकाण्डस्य प्रतिपादने तथाविधसाहाय्यप्रदाने च सक्षमं सार्थकञ्च यच्छास्त्रं तमेव विद्वांसो वेदाङ्ग इति नाम्ना कथयन्ति व्यवहरन्ति च । पुनरत्र वेदाङ्गत्वपदार्थविषये चर्चां प्रस्तौमि ।

वेदस्य वेदार्थस्य च यथार्थज्ञानाय शिक्षादिषड्विषयान् सम्यगध्ययनस्य नितान्तं प्रयोजनं विद्यते। ततश्चाऽयं प्रयासो यत् वेदमन्त्राणां समुचितरूपेणोच्चारणं प्रथम कल्पः । अतएव शाब्दिकमन्त्राणां यथार्थरूपेणोच्चारणस्थापने प्रमुखं महत्त्वं प्रकल्पते । एतदर्थं प्रवर्तमाना व्यवह्रियमाणा च पद्धतिश्च वेदाङ्गेषु प्रथमचरणे स्थापिता भवति ।

शब्दकल्पद्रुमे यथा-वेदो वेदविव्यङ्गो वेदवित् कविः । अत्र वेदाः प्रमाणम् इति प्राचीनासु भारतीयभाषासु यथा संस्कृतं सर्वातिशायि वर्वर्ति तथैव सर्वेषु वाङ्मयेषु वैदिकवाङ्मयं प्रामाणिकरूपेण स्वीक्रियते जोघुष्यते च सर्वैरपि सुधिभिः । सर्वेऽपि मतावलम्बिनः स्व-स्व मतं वेदोक्तैः प्रमाणैः परिपुष्टतां गमयित्वा स्वां कृतिं धन्यां, स्वं च धन्यं कलयन्ति, कथमियं वार्ता ? विषयेऽस्मिन् न केवलं भारतीय एव श्रद्धालवः, अपितु पाश्चात्या अपि विद्वांसः श्रद्धावद्धावधाना दृश्यन्ते । नूनमत्र किमपि एतादृशं वैशिष्ट्यं वरीवर्ति, येनास्य सम्मानं सर्वैरपि समानरूपेण स्वीक्रियते ।

वैदिका ऋषयः मनोभिलषितभावाभिव्यक्तीकरणे परमपटव आसन् । यत्रतत्रान्तर्भावानामभिव्यक्तिहेतवे सृष्ट्युत्पत्तिकरणविचारविमर्शोऽपि कृतवन्त आसन् । वेदाङ्गभूतानां ग्रन्थानामवलोकनेनानुभूयते यत् वेद एव अस्माकं संस्कृत्या मूलस्रोतमस्ति । विश्वस्यागमेषु वेदाः प्राचीनतमाः, अत एव नृशास्त्रज्ञानां, मानवप्रकृतेरध्येतृणां जगतो विभिन्नेषु धर्मेषु सस्रद्धं प्रवर्तमानानाञ्च जनानां सानुरागविषया इमे वेदा इति सर्वेषां विदितचरमेव । ये जना वेदानामभ्यन्तरे सांसारिकसमस्तैश्वर्याणामन्वेषमक्लान्तपरिश्रमेण कुर्वन्ति, ते न जानन्ति वेदज्ञानयो र्मध्येऽन्तरमस्ति। अस्तु वेदस्य नाम ज्ञानं विज्ञानम् इति । वेदाः वेदाङ्गत्वेन तावत् महनीयत्वं भजन्ते । यत्र वैदिकं कर्मकाण्डम्, यज्ञयागादेः यथार्थमनुष्ठानम्, वेदाङ्गानि ह्युपाङ्गानि च वेदाङ्गत्वेन तावतानि कानिचित् वैशिष्ट्यानि कथ्यन्ते ।

षण्णां वेदाङ्गाणां प्रयोजनं तु पश्चात् प्रस्तोष्यते। अत्र पुनः चतुर्णामुपाङ्गनां स्वरूपं तावद् उच्यते। तत्र सर्गप्रतिसर्गमन्वन्तरवंशवन्श्यानुचरितप्रतिपादकानि भगवता बादरायेन निरूपितानि पुराणानि। एतानि पूर्वं मया अष्टादशविद्यायाः स्वरूपान्तर्गते विचार्यते । तत्र तानि च महापुराणोपपुराणभेदाश्चतुः पञ्चाशत् इति । तेषां पुराणानाञ्च सर्गप्रतिसर्गादिज्ञानं सद्धर्माचरणप्रवृत्त- दर्शनमेव सम्यक् प्रयोजनम् । न्याय - आन्वीक्षिकीविद्या गौतमप्रणीता । प्रमाणप्रमेयादिषोडशपदार्था – नामुद्देश्यलक्षण-परीक्षाभिस्तत्त्वज्ञानात् निःश्रेयसाधिगम एव तत्प्रयोजनम्। कणादादिप्रणीतं वैशेषिकं शास्त्रमपि सप्तपदार्थव्युत्पादनैकप्रयोजनम्। तच्च न्यायएवान्तर्भूतमित्युक्तं प्राक् ।

मीमांसा द्विविधा- धर्ममीमांसा शारीरमीमांसा चेति । तत्र द्वादशाध्यायी षोडशाध्यायी चेति । धर्ममीमांसा - अथातो धर्मजिज्ञासा इत्यारभ्य अन्वाहार्ये च दर्शनात् । यथा याज्यसम्प्रेषो यथा याज्यसम्प्रेषः इत्यन्ता भगवता जैमिनिना प्रणीता । तस्याश्च धर्मप्रमाणादिविज्ञानपूर्वकर्मकाण्डव्यवस्थापरिज्ञानाय उपयोगः । शारीरिकमीमांसा च अथातो ब्रह्मजिज्ञासा इत्यारभ्य अनावृत्तिः शब्दानावृत्तिः शब्दात् इत्यन्ता जीवब्रह्मैकत्वसाक्षात्कारहेतुश्रवणाख्य-विचारप्रतिपादकान् न्यायानुपदर्शयन्ती भगवता बादरायणेन कृता। तच्च जीवब्रह्मैक्यसाक्षात्कार : प्रयोजनम् ।

एवञ्च धर्मशास्त्राणि मनुयाज्ञवल्यक्यविष्णुमङ्गिरोवशिष्ठदक्षशातातपपराशरगौतमशङ्ख-लिखितानि - हारीतापस्तम्बोशनोव्यास- कात्यायन-वृहस्पति-देवलनारदपैठीनसिप्रवृत्तिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादिकानि धर्माङ्गानि व्यवहृतानि । एवं व्यासकृतं महाभारतम्, वाल्मीकिकृतं रामायणम्, इतिहासत्वेन प्रसिद्धे बभूवतुः ।

ते च धर्मशास्त्रे एवान्तर्भूते इत्युक्तं प्राक्। एवञ्च सर्वदेवसाधारणमन्त्रशास्त्रं श्रीमहादेवब्रह्मगौतमादिप्रणीतं धर्मशास्त्रे एवान्तर्भूतम् । स्वेष्टदेवतायाः सकाशात् स्वाभीप्सितफलप्राप्तिस्तत्प्रयोजनम् । तथा हि निरूपितचतुर्णामुपाङ्गानां प्रयोजनभेदः ।

अथ च संक्षेपेण तावत् चतुर्णामुपवेदानां स्वरूपं तावत् उच्यते । वेदचतुष्टयस्य च क्रमेण चत्वार उपवेदाः । उपवेदाः। तत्र ऋग्वेदोपवेदस्य ब्रह्मप्रजापत्यादिविनिर्मितस्य आयुर्वेदस्याऽष्टौ स्थानानि भवन्ति । सूत्रमिति शारीरमैन्द्रियं चिकित्सानिदानं विमानं कल्पं प्रसिद्धिः चेति । कामशास्त्रस्यापि आयुर्वेद एवान्तर्भावः । सुश्रुतेन वाजीकरणाख्यकामशास्त्रस्याभिधानात् । एवञ्च समस्तस्य आयुर्वेदस्य

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 8 Issue 7, July- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

रोगतद्धेतुरोगनिवृत्तितत्साधनज्ञानं हि प्रयोजनम्।

तच्च मोक्षसाधनीभूतशरीरारोग्यसम्पादकत्वेन मोक्षोपयोगी एव एवञ्च यजुर्वेदोपवेदो धनुर्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः। क्षत्रियाणां स्वधर्माचरणं युद्धं दुष्टदस्युचौरादिभ्यः प्रजापालनञ्च धनुर्वेदस्य प्रयोजनम् । एवं हि सामवेदोपवेदा गान्धर्वशास्त्रं भरताचार्येण प्रणीतम् ।

तत्र नृत्यगीतवाद्यभेदेन बहुविधोऽर्थः प्रपञ्चितः । तस्य गान्धर्ववेदस्य देवताराधननिर्विकल्पकसमा - राध्यसिद्धिः तत्प्रयोजनम् । रसशास्त्रञ्च बहुविधं भरतेनैव प्रणीतं गान्धर्ववेदान्तर्भूतम् । तच्च रसरीतिशब्दालङ्कारनायक-नायकादिवर्णनरूपम्।

अथ च अथर्ववेदोपवेदोऽर्थशास्त्रम् । तच्च ऐहिकसर्वसुखोपलब्धि-प्रयोजनम् । तेन तदनुसारेण नीतिशास्त्रमपि मन्वादिभिः सूत्रितं कामन्दकादिभिः प्रणीतम् । तत्सन्धिविग्रहादिभेदैर-नेकधा । लौकिकसर्वव्यवहारनैपुण्यमेव तत्प्रयोजनम् ।

एवञ्चाश्वशास्त्रं गजशास्त्रं शिल्पशास्त्रं किम्वा चतुषष्टिकलाशास्त्रञ्चेति नानाशास्त्राणि शालिहोत्रादीनां मुनिभिः प्रणीतानि । तेषाञ्च सर्वषां लौकिकानां तत्प्रयोजनभेदो अस्माभिः द्रष्टव्यः । एवञ्चाष्टादशविद्याः सप्रयोजनाः सङ्क्षेपतो नाम निर्देशेन प्रोक्ताः । तथा च कपिलमुनिप्रणीतं सांख्यशास्त्रं पातञ्जलयोगशास्त्रं पाशुपतशास्त्रं नारदादिभिः कृतं वा पाञ्चरात्रादिकं वैष्णवशास्त्रं चेत्येवमादिर्वेदानुकूलः प्रस्थानभेदः प्रदर्शितः ।

इत्थं हि वेदराशिमयस्य भगवतो ज्ञानमयं शरीरमित्याख्यायते । इत्यादिना वेदाङ्गानि सन्ति वेदस्योपकारकः। महनीयेऽस्मिन् जगतीलते पुरुषार्थचतुष्टयस्य साधको मानवो भवति । मानवानां देहे देहे यथा हस्तपादादयो विविधानि अङ्गानि भवन्ति तथैव धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थस्य प्रतिपादका वेदास्सन्ति । वेदा अपि अङ्गैरेव व्याक्रियन्ते । अत एव चतुर्दशविद्यासु अङ्गानां चर्चा क्रियते ' ।

१. अष्टादशविद्या: वर्णिताः शतपथब्राह्मणे तत्र भूमिकायाम् ।

**International Journal of Research in Economics and Social Sciences(IJRESS)**
Available online at: http://euroasiapub.org
Vol. 8 Issue 7, July- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939
**(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)**

शिक्षाङ्गव्यपदिश्यते-

अङ्गशब्दस्य व्युत्पत्तिलभ्यः अर्थोस्ति- अङ्ग्यन्ते ज्ञायन्ते अमीभिरिति अङ्गानि । अत्रायमाशयः यद् यैरुपकरणैः अर्थात् येन कस्यापि वस्तुनः स्वरूपज्ञाने साहाय्यं भवति तमङ्गमिति । वेदः स्वयमेवैकः दुरूहो विषयोऽस्ति । भाषा - भावयोः द्वयोरपि दृष्ट्वा अनुभूयते । तदर्थज्ञाने, तस्य कर्मकाण्डस्य प्रतिपादने यानि उपयोगीनि शास्त्राणि सन्ति तानि एव वेदाङ्गानि भवन्ति ।

वेदस्य यथार्थज्ञानलाभाय षण्णां विषयाणां ज्ञानमपेक्षितं भवति। मन्त्राणां शुद्धमुच्चारणं तथा तेषामर्थानां ज्ञानाय एतानि षडङ्गानि साहाय्यकानि भवन्ति । अस्माकं शरीरे यथा बहूनि अङ्गानि सन्ति । तानि अङ्गानि शरीरोपकाराय प्रवर्तन्ते । तथैव वेद अपि भगवतः शब्दमयब्रह्मराशिः वर्तते। ग्रन्थविशेषरूपेण अखिलब्रह्माण्डनायकस्य स्वरूपमस्ति ।

मन्ये तेषां शब्दमयचिन्तनं न पारयितुं शक्यम् । अतः तेषां शब्दकल्पानां निगूढत्वं सम्यक्तया कथमुच्चारितुं शक्यते न जाने मे मनसि । तस्माद् तस्य वेदस्य सर्वतोभावेन मुक्तकण्ठेन यथाश्रुतशब्दराशिभिः वर्णनं विधास्यते इति सङ्कल्पः ।

शब्दमयमन्त्राणां यथार्थोच्चारणाय प्रवर्त्तमानं वेदाङ्गं - शिक्षा- इत्यभिधीयते । वेदस्य मुख्यप्रयोजनं वैदिककर्मकाण्डस्य यज्ञायागस्य च यथार्थानुष्ठानमस्ति । अस्मिन्नर्थे प्रवृत्तमङ्ग - कल्प- इति कथ्यते । कल्पस्य व्युत्पत्तिलभ्योऽर्थो भवति । कल्प्यते समर्थ्यते यागप्रयोगोऽत्र - इति । वेदानां रक्षकत्वात् वेदार्थावबोधने सहायकत्वात् प्रकृतिप्रत्ययोपदेशपुरः सरपदस्वरूपप्रतिपादक - त्वादर्थनिर्णयनकत्- साधनेषु अन्यतमसाधनत्वेन व्याकरणं नाम वेदाङ्गं नितानतमेव महनीयं श्रेष्ठञ्च वर्तते।

निरुक्तस्यास्ति विषयः-वैदिकपदानां व्युत्पादनम्। निरूच्यते निश्शेषेणो-पदिश्यते तत् तदर्थावबोधनाय पदजातं यत्र निन्निरुक्तमिति कथ्यते । वेदाः सन्ति छन्दोबद्धाः । अतस्तेषामुच्चारणनिमित्ताय छन्दोज्ञानं नितरामपेक्षितम्। तथैव यज्ञभागाः बहुविधा सन्ति । केचन यज्ञा एवंविधा विधाने नीता ये सम्बत्सर- संबंधिनः सन्ति । केचन क्रतुसम्बंधिनो वर्तन्ते। केचन च तिथि - मास-पक्ष-नक्षत्रपरकाः सन्ति । वेदाङ्गस्य नेत्रत्वेन प्रधानमङ्ग ज्योतिषं नाम नैजं वैशिष्ट्यं निदधाति । सर्वं खलु भाषाविज्ञानपदार्थेषु साहाय्यं कथं भवतीति अग्रे यथोचितप्रकरणे वर्णयिष्यामि ।

International Journal of Research in Economics and Social Sciences(IJRESS)
Available online at: http://euroasiapub.org
Vol. 8 Issue 7, July- 2018
ISSN(o): 2249-7382 | Impact Factor: 6.939
(An open access scholarly, peer-reviewed, interdisciplinary, monthly, and fully refereed journal.)

वस्तुतः वैदिकमन्त्राणामुचितोच्चारणाय शिक्षायाः, कर्मकाण्डस्य यज्ञीयानुष्ठानस्य च निमित्ताय कल्पस्य, शब्दानां रूपज्ञानाय व्याकरणाय, अर्थज्ञानस्य निर्वचनाय च निरूक्तस्य, वैदिकच्छन्दसां ज्ञानलाभाय छन्दसस्तथाऽनुष्ठानस्योचित - कालनिर्णयार्थं ज्योतिषशास्त्रस्य च प्रयोजनमस्ति ।

आधुनिकानाम् इतिहासकाराणां कथनमिदं यत् षण्णामपि वेदाङ्गानां निर्माणं वैदिक युगस्योत्तरार्द्ध भागेऽभवत् । शिक्षा, व्याकरणम्, कल्पः, निरूक्तम्, छन्दः, ज्यौतिषञ्च इत्येतानि वेदाङ्गानां सन्ति नामानि । पाणिनीयशिक्षायां प्रोक्तम्-

शिक्षा कल्पो व्याकरणं निरूक्तं छन्दसां चयः ।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ।।
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते ।।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।

महाभाष्ये पस्पशाह्निके पतञ्जलिनाऽप्युक्तम्- ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च । षण्णामप्येतेषां वेदाङ्गानामुल्लेखो गोपथब्राह्मण-बौधायनधर्मसूत्र गौतमधर्मसूत्र - रामायणसमेषु प्राचीनग्रन्थेषु उपलभ्यते। एतेन तेषां पुरातननत्त्वं सिद्ध्यति । बुद्धावतारात् प्राक्त्तीकाल उत्तरवैदिककालत्वेन निर्धार्यते बुधैः । वेदानां भाषाभावश्च उभावपि दुरूहौ स्तः । तस्माद् वेदार्थावगमनाय वेदाङ्गानामपेक्षा भवति । भाषावेदार्थबोधाय सहायकत्वात् तेषामुपकारकत्वं स्पष्टमेव ।

१. पाणिनीयशिक्षायाम् ।